॥ ॐ॥

## ऋग्वेदः

ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्॥

### ऐतरेय उपनिषद्

ॐ आत्मा वा इदमेक एवाग्र आसीत्-नान्यत्किञ्चन मिषत्। स ईक्षत लोकान्नु सृजा इति॥

## यजुर्वेदः

ॐ इषेत्वोर्जेत्वा वायवस्थोऽपायवस्थः श्रेष्ठतमाय कर्मणे॥

### ईशावास्य उपनिषद्

ॐ ईशावास्यमिदग्ं सर्वं यत्किञ्च जगत्यां जगत्।

तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्॥

## सामवेदः

ॐ अग्न आया हि वीतये गृणानो हव्यदातये। नि होता सत्सि बर्हिषि॥

### केनोपनिषद्

ॐ केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः।

केनेषितां वाचमिमां वदन्ति चक्षुः श्रोत्रं क उ देवो युनक्ति॥

## अथर्ववेदः

ॐ शं नो देवीरभीष्टय आपो भवन्तु पीतये। शंयोरभिस्रवन्तु नः॥

### माण्डूक्य उपनिषद्

ओमित्येतदक्षरमिदग्ं सर्वं तस्योपव्याख्यानं भूतं भवद् भविष्यदिति सर्वमोङ्कार एव।

यच्चान्यत् त्रिकालातीतं तदप्योङ्कार एव॥

## अथ उपवेदाः

### आयुर्वेदः - चरक संहिता

अथातो दीर्घञ्जीवितीयम् अध्यायं व्याख्यास्यामः।

## आयुर्वेदः - सुश्रुत संहिता

अथातो वेदोत्पत्तिम् अध्यायं व्याख्यास्यामः।

## धनुर्वेदः (महर्षि शार्ङ्गधरः)

ईश्वरोक्तात् धनुर्वेदात् व्यासस्यापि सुभषितात्।

पदान्याकृष्य रचितो ग्रन्थः संक्षेपतो मया॥

## गन्धर्ववेदः - नाट्य शास्त्रम्

प्रणम्य शिरसा देवौ पितामहमहेश्वरौ।

नाट्यशास्त्रं प्रवक्ष्यामि ब्रह्मणा यद् उदाहृतम्॥

## गन्धर्ववेदः - सङ्गीत-रत्नाकरः

ब्रह्मग्रन्थिज-मारुतानुगतिना चित्तेन हृत्पङ्कजे

सूरीणामनुरञ्जकः श्रुतिपदं योऽयं स्वयं राजते।

यस्माद् ग्राम-विभाग-वर्ण-रचनाऽलङ्कार-जाति-क्रमो

वन्दे नादतनुं तमुद्धुरजगद् गीतं मुदे शङ्करम्॥

## स्थापत्यवेदः - मानसारम्

उत्पत्ति-रक्षण-लयान् जगतां प्रकुर्वन् भु-वारि-वह्नि-मरुतो-गगनं च सूते।

नाना सुरेश्वर-किरीट-विलोल-माला-भृङ्गावलीढ-चरणाम्बुरुहं नमामि॥

## अथ वेदाङ्गाः

### शिक्षा

शीक्षां व्या᳚ख्यास्या॒मः। वर्ण॒-स्स्वरः। मात्रा॒ बलम्। साम॑ सन्ता॒नः। इत्युक्त-श्शी᳚क्षाध्या॒यः॥

### व्याकरणम्

वृद्धिरादैच्।

## माहेश्वर-सूत्राणि

अ इ उ ण्। ऋ ऌ क्। ए ओ ङ्। ऐ औ च्। ह य व र ट्। ल ण्। ञ म ङ ण न म्। झ भ ञ्। घ ढ ध ष्। ज ब ग ड द श्। ख फ छ ठ थ च ट त व्। क प य्। श ष स र्। ह ल्।

## कल्पम्

अथातो-अग्निं प्रणेष्यन् प्रागुदक् प्रवणमभ्युक्ष्य स्थण्डिलं लक्षमं कुर्यात्।

## ज्योतिषम्

अथैकदा मुनिश्रेष्ठं त्रिकालज्ञं पराशरम्।

पप्रच्छोपेत्य मैत्रेयः प्रणिपत्य कृताञ्जलिः॥

## छन्दः

नमस्तुङ्ग-शिरश्चुम्बि-चन्द्र-चामर-चारवे।

त्रैलोक्य-नगरारम्भ-मूल-स्तम्भाय सम्भवे॥

## निरुक्तम्

अथ निघण्टुः

गौः। ग्मा। ज्मा। क्ष्मा। क्षा। क्ष॒मा। क्षो॒णी। क्षि॒तिः। अ॒वनिः। उ॒र्वी॑। पृ॒थ्वी। म॒ही। रि॒पः। अदि॑तिः। इळा॑। निर्ऋ॑तिः। भूः।
भूमि॑ः। पू॒षा। गा॒तुः। गोत्र इति पृथिव्याः।

## अमरकोषः

यस्य ज्ञानदयासिन्धोः अगाधस्यानघा गुणाः।

सेव्यताम् अक्षयो धीराः स श्रिये चामृताय च॥

## अथ उपाङ्गाः

### दर्शनानि – न्यायम्

प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेतु-आभासच्छल-जाति-निग्रह-

स्थानानां तत्त्वज्ञानात्-निःश्रेयसाधिगमः॥

### वैशेषिकम्

अथातो धर्मं व्याख्यास्यामः।

### साङ्ख्यम्

प्रकृतिं पुरुषं नत्वा साङ्ख्यसूत्रे विधीयते।

सङ्क्षेपतो विवरणम्-अविवेक-अपनुत्तये॥

### योगम्

अथ योगानुशासनम्॥

### पूर्व-मीमांसा

अथातो धर्मजिज्ञासा

### उत्तर-मीमांसा

अथातो ब्रह्मजिज्ञासा

## अथ इतिहासाः

### वाल्मीकि रामायणम्

तपःस्वाध्याय-निरतं तपस्वी वाग्विदां वरम्।

नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम्॥

### तुलसी रामायणम्

वर्णानामर्थसंघानां रसानां छन्दसामपि।

मङ्गलानां च कर्तारौ वन्दे वाणीविनायकौ॥

## महाभरतम्

नारायणं नमस्कृत्य नरं चैव नरोत्तमम्।

देवीं सरस्वतीं चैव ततो जयमुदीरयेत्॥

## अथ पुराणम्

### श्रीमद्-भागवतम्

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्

तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः।

तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोमृषा

धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि॥

### नारद-भक्ति-सूत्रम्

अथातो भक्तिं व्याख्यास्यामः॥

## अथ धर्म-शास्त्राणि

### श्रीमद्भगवद्गीता

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः।

मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय॥

### मनु-स्मृतिः

मनुम्-एकाग्रम्-आसीनम् अभिगम्य महर्षयः।

प्रतिपूज्य यथा न्यायम् इदं वचनम्-अब्रुवन्॥

### धर्म-सूत्रम्

अथातः सामयाचारिकान् धर्मान् व्याख्यास्यामः।